**SATISAR FOUNDATION**

**GLOBAL WORKSHOP ON MANTRA RECITATION OF**
**Mata SHARIKA (Sri Rajrajeswari)**
**29TH.June 2020 @ 7.30 PM**





बीजैः सप्तभिरुज्ज्वलाकृतिरसौ या सप्तसप्तिद्युतिः
सप्तर्षिप्रणताङ्घ्रिपङ्कजयुगा या सप्तलोकार्तिहृत् ।
काश्मीरप्रवरेशमध्यनगरे प्रद्युम्नपीठे स्थिता
देवीसप्तकसंयुता भगवती श्रीशारिका पातु नः ॥

श्री गणेश जी , श्री गुरु तथा पंचदेव का संमरण कर
माता के नित्य साधक धूप दीप के पश्चात
हाथों पर जल ले कर सायं 7.00 बजे संकलप
कर हमारा मार्गदर्शन करेगे
ध्यान,गायत्री व् मंत्र सायं 7.00 बजे
प्रारम्भ करे

आसन पर ही जप करे
जप माला अथवा करमाला पर जप करे

देव स्थूलतनुं गजेन्द्रवदनं,लम्बोदर सुन्दरं
विघनेशं मदगन्धलोलमधुपव्यालोलगण्डस्थलम्–
दन्ताघातविदारिताहितजनं सिन्दूरशोभाकरं
वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदम्।।

**ALL SHALL START THE JAP (RECITATION)**
**7.30 on 29-06-2020**

- धूप व् दीप जलाए
- तिलक लगाए
- देवी की मूर्ति /चित्र पर तिलक व् पुष्प लगायें
- जप के बाद नैवेद्य के रूप मे किशमिश व् त हर आदि का भोग चढावें
- जो साधक संकल्प लेने का नियम प्रयोग करना चाहे तो वे सभी जन 7.00 PM पर प्रारंभ करे यह जप हम अपने देश के उपद्रवों का संहार साधक जनो की रक्षा के लिए व् माता शारिका की संतुष्टि हेतु
- ध्यान एक बार पढें , गायत्री तीन बार पढें

मन्त्र का जप 108 अथवा 1008 बार करें
देवी के स्तोत्रों व् चरित्रों का गान कर लीला पढकर क्षमा माँगे



## संक्लप करें

अस्य श्री शारिका भगवती महादेव ऋषिः त्रिष्टुप छन्दः,
श्री शारिका भगवती देवता ,शां बीजं , श्रीं शक्तिः, फां
कीलकं, आत्मनो वांग,मनः,कायो उपाजिंत पाप
निवारणार्थे , स्वदेशे उपद्रवं च रोगं शमनार्थे,
साधकाना अनुग्रह प्राप्तार्थे जपे विनियोगः

### न्यास

| कर न्यास | षड् अंग न्यास |
|---|---|
| उों अङ्गुषठाभ्यां नमः | उों हृदयाय नमः |
| ह्रां तर्जनीभ्यां नमः | ह्रां शिरसे स्वाहा |
| श्रां मध्यमाभ्यां नमः | श्रां शिखाये वषट् |
| उों अनामिकाभ्यां नमः | उों कवचाय हूं |
| ह्रां कनिष्काभ्यां नमः | ह्रां नेत्राभ्यां वोषट् |
| श्रां करतल कर पृष्ठाभ्यां नमः | श्रां अस्त्राय फट चुटकी |

**प्राणायाम मन्त्र– उों ह्रां श्रां**

### ध्यान

बालार्क कोटिध्युतिम् इन्दु चूडां
वरासि चक्रा अभय बाहुमाध्याम्।
सिंहाधि रुढां शिववाम् देवलीलां
भजे चेतसि शारिकेशीम्।।

### गायत्री

ओम् शारिकायै विदमहि , सप्ताझर्यै धीमहि तन्नः शारी प्रचोदयात्

### मंत्र

ओम् ह्रीं श्रीं हूं फ्रां आं शां शारिकायै नमः 108

गुह्याति गुह्य गोप्त्रीं, त्वं गृहाणास्मत्कृतं जपम्।
सिद्धिः भवतु मे देवि त्वत् प्रसादात् सुरेश्वरि।।
अनेन मन्त्र जपेन आत्मनो,
वाङ्ग मनः कायो, उपार्जितं
पाप निवारणार्थं ईष्ट कामना सिद्धय् अर्थं,
श्री शारिका भगवती साङ्ग,
सपरिवारः प्रीयतां प्रीतो अस्तु।।

**देवी ध्यान रत्न माला से उदरित**

ॐनमो भवान्यै।।

भक्तानुग्रहकारिणी भगवती देवाधिदेवेश्वरी
दीनानाथकृपावती स्वजननी भक्तानुरक्ता
ॐ काराक्षरवासिनी सुरनुता सर्वेश्वरी सर्वदा
भूयान्नो वरदा सदा ह्यभयदा कामेश्वरी कामदा।।

वराङ्कुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम्
बालार्ककोटिप्रतिभां त्रिनेत्रां भजेहमाद्यां भुवनेश्वरीं ताम्
माता भवानी च पिता भवानी बन्धुर्भवानी च गुरुर्भवानी।
विद्या भवानी द्रविणं भवानी यतो यतो यामि ततो भवानी।।

श्रीशङ्खचक्रमुसलाम्बुजयुग्महस्तां
नागेन्द्रहारबलयाङ्किकतकण्ठमालाम्।
सिदूरकुंकुमसहस्रमरीचिदीप्तां
श्रीशारिकां त्रिनयनां हृदये स्मरामि।।

बालार्ककोटिद्युतिमिन्दुचूडां वरासिचक्राभयबाह्यमाद्याम्।
सिंहाधिरुढां शिववामदेहलीनां भजे चेतसि शारिकेशीम्।।

या कुन्देन्दुतुषारहारधवला या श्वेतपद्मासना
या वीणावरदण्डमण्डितकरा या शुभ्रवस्त्रान्विता।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा।।
या श्रीर्वेदमुखी तपःफलमुखी नित्यं च निद्रमुखी
नानारुपधरी सदा जयकरी विद्याधरी शंकरी।
गौरी पीनपयोधरी रिपुहरी मालास्थिमालाधरी
सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा।।
या देवी शिवकेशवादिजननी यावैजगद्रूपिणी
या ब्रह्मादिपिपीलिकान्तजनतानन्दैकसंदायिनी।
या पञ्चप्रणमन्निलिम्पनयनी या चित्कलामालिनी
सा पायात्परदेवता भगवती श्रीराजराजेश्वरी।।

या माया मधुकैटभप्रमथिनी या माहिषोन्मूलिनी
या धूम्रेक्षणचण्डमुण्डमथिनी या रक्तबीजाशनी।
शक्तिः शुम्भनिशुम्भदैत्यदलिनी या सिद्धलक्ष्मीः परा
सा देवी नवकोटिमूर्त्तिसहिता मां पातु माहेश्वरी।।

या खड्गं डमरुं त्रिशूलपरशू खटवाङ्गपाशौ गदां
चक्रं मुद्गरचापबाणावरदाभीतीः कपालाङ्कुशौ।
धत्ते तोमरपुस्तके च मुसुलं दोर्भिर्दशात्ताष्टभि–
र्देवीभिः परिवारिता शशिधरा सा शारिका पातु नः।।

बीजैः सप्तांभिरुज्जवलाकृतिरसौ या सप्तसांप्तिद्युतिः
सप्तर्षिप्रणताङ्घ्रिपङ्कजयुगा या सप्तलोकार्तिहृत्।
काश्मीरप्रवरेशमध्यनगरीप्रद्यम्नपीठे स्थिता
देवीसप्तकसंयुता भगवती श्रीशारिका पातु नः।।

ब्रह्माणं च पुरन्दरं शिवहरी देवान्समस्तान्मुनीन्
या द्रष्टया दयया विलोकयति सा देव्यम्बिका पार्वती।
चक्रस्था निजबोधभासितजगच्छान्तात्मिका सर्वगा
सान्द्रानन्दप्रदा परा भगवती पायात्सदाशारिका।।

भक्तानां सिद्धिदात्री नलिनयुगकरा श्वेतपद्मासन्स्था
लक्ष्मीरुपा त्रिनेत्रा हिमकरवदना सर्वदैत्येन्द्रहर्त्री।
वागीशी सिद्धिकर्त्री सकलमुनिजनैः सेविता या भवानी
नौम्यहं नौम्यहं त्वां हरिहरप्रणतां शारिकां नौमि नौमि।।





## श्रीराजराजेश्वरी स्तुतिः

ॐ नमो भवान्यै

### ध्यान

ॐ छन्दः पादयुगा निरूक्तसुमुखा शिक्षा च जंघायुगा
ऋग्वेदोरूयुगा युजुःसुजघना या सामवेदोदरा।
तर्कन्यायकुचा श्रुतिस्मृतियुक् काव्यादिवेदानना
वेदान्तामृतलोचना भगवती श्रीराजराजेश्वरी।।

या देवी शिवकेशवादिजननी, यावैजगद्रूपिणी
या ब्रह्मादिपिपीलिकान्तजनतान्नन्दैकसंदायिनी।
या पञ्चप्रणमन्निलिम्पनयनी. या चित्कलामालिनी
सा पायात्परदेवता भगवती, श्रीराजराजेश्वरी।। 1

कल्याणायुतपूर्णबिम्बवदना पूर्णेश्वरी नन्दिनी
पूर्णा पूर्णतरा परेशमहिषी पूर्णामृतास्वादिनी।
सम्पूर्णा परमोत्तमामृतकला विद्यावती भारती
श्रीचक्रप्रियबिन्दुतर्पणपरा श्रीराजराजेश्वरी। 2

एकाकारमनेकवर्णविविधाकारैकचिद्रूपिणी
चैतन्यात्मकएकचक्ररचिता चक्रांगएकाकिनी।
भावाभावविभाविनी भयहरा सदभ्क्तचिन्तामणिः।3। श्रीचक्रे०।

ईशाधीश्वरयोगिवृन्दविधृता स्वानन्दभूता परा
पश्यन्तीत्यनुमध्यमा विलसती श्रीवैखरीरूपिणी।
आत्मानात्मविचारिणी त्रिनयना विद्यावती भारती।4 श्रीचक्र०

लक्ष्यालक्ष्यनिरीक्षणां निरूपमा रूद्राक्षमालाधरा
साक्षात्कारणदक्षवंशकलितां दीर्घातिदीर्घेश्वरी।
भद्रां भद्रवरप्रदा भगवतीं भद्रेश्वरी भद्रदा।5 श्रीचक्र०।

ह्रींबाजानलनादबिन्दुभरता सत्कार (ओंकार) नादात्मिका
ब्रह्मानन्दघनोदरी गुणवती ज्ञानेश्वरी ज्ञानदा।
इच्छाज्ञानक्रियावती जितवती गन्धर्वसंसेविता।6 श्रीचक्र०

ह्र्षोन्मत्तसुवर्णपात्रभरिता पार्श्वोन्नता घूर्णिता
हुंकारप्रियशब्दब्रह्म (राशि) निरता स्वारस्वतोल्लासिनी।
सारासारविचारचारूचरिता वर्णाश्रमाकारिणी 7 श्रीचक्र०।

सर्वज्ञानकलावती सकरूणा सन्नादिनी नन्दिनी
सयोगप्रयरूपिणी प्रियवती प्रीता प्रतापोन्नता
सर्वान्तर्गतशालिनी शिवतनूसन्दीपिनी दीपिनी 8 श्रीचक्र०।।



कर्माकर्मविवर्जिता कुलवती कर्मप्रदा कौलिनी
कारूण्यावधि सर्वकर्मनिरता सिन्धुप्रिया शालिनी।
पूर्णब्रह्मसनातनान्तरगता ज्ञेया स्वयोगात्मिका 9 श्रीचक्र०।

हस्तिकुम्भसदृक्पयोधरावरा पीनोन्नता नम्रगा
हाराद्याभरणा सुरेन्द्रविनुता शृङ्गाटपीठालया।
योन्याकारकयोनिमुद्रितकरा नित्यं सुवर्णात्मिका 10 श्रीचक्र०।

लक्ष्मीलक्षणपूर्णकुम्भरवदा लीलाविनोदस्थिता
लाक्षारञ्जितपद्मपादयुगला ब्रह्माण्डसंसेविता।
लोकालोकितलोककामजयिनी लोकाश्रयाङ्काश्रया 11 श्रीचक्र०।।

ह्रींकाराङकितशङकरप्रियतनुः श्रीयोगपीठेश्वरी
माङ्गल्यायुतपङकजाभनयना माङ्गल्यसिद्धिप्रदा।
तारूण्यात्तपसार्चिता तरूणिका तन्त्रोपमातन्विता 12 श्रीचक्र०।।

सर्वेशाङ्गविहारिणी सकरूणा सर्वेश्री सर्वगा
सत्या सर्वमयी सहस्रदलगा सप्तार्णवोपस्थिता।
सङ्गासङ्गविवर्जिता सुखकरी बालार्ककोटिप्रभा 13 श्रीचक्र०।।

कादिक्षान्तसुवर्णबिन्दुसुतनुः स्वर्णादिसिंहासना
नानारत्नविचित्ररचिता चातुर्यचिन्तामणिः।
चित्तानन्दविधायिनी सुविपुला कोटित्रयीश्यम्बिका 14 श्रीचक्र०।।
लक्ष्मीशादिविरिञ्चचक्रमुकुटा द्यष्टाङ्गपीठार्चिता
सूर्येन्द्वग्निमयैकपीठनिलया चिन्मात्रकौलेश्वरी
गोप्त्री गुर्विणिगर्विता गगनगा गङ्गा गणेशप्रिया ।15 श्रीचक्र० ।।

ह्रींकारत्रयरूपिणी समयिनी संसारिणी हंसिनी
वामाचारपरायणीं सुमुकुटा बीजावती मुद्रिणी।
कामाक्षी करूणाविचित्ररचिता श्रीं श्रीं त्रिमूर्त्यात्मिका 16 श्रीचक्र०।।

सा बिम्बप्रतिबिम्बलम्बित लसत् बिम्बाधरा याम्बिका
जम्बीरोत्पलकर्णशोभितमुखा जम्बूफल श्रीकुचा।
नानारत्नकिरीटदीप्तिलसिता प्रत्यक्षदीक्षात्मिका 17 श्रीचक्र०।।

यत्तेजो निधिभिस्त्वनन्तघृणिभिर्नोपाह्यते प्रेरितुम्।
हार्दं ध्वान्तमपास्य सिक्षणपि तद्धयान मात्रा दृशा।।
यत्सदभादनुभाति सर्वमुदितं भानुं यथा पद्मिनी।
प्रत्यग्धाम नमाम तत्तव वपुः श्रीराजराजेश्वरी ।।18।।



आरक्ताभां त्रिनेत्रां मणिमुकुटवतीं रत्नताटङ्करम्यां
हस्ताम्भोजैः सपाशाङ्कुशमदनधनुःसायकैर्विस्फुरन्तीम्।
आपीनोत्तुङ्गवक्षोरुहतटविलुठत्तारहारोज्जवलाङ्गीं।
ध्यायाम्यम्भोरुहस्थामरुणविवसनामीश्वरीमीश्वरानाम।।

जय भगवति, विन्ध्यवासिनी, कैलासवासिनी, श्मशानवासिनी, हुङ्कारिणी, कालायनि, कात्यायनि, हिमगिरितनये, कुमारमातः, गोविन्दभगिन्नि, शितिकण्ठकण्ठाभरणे, अष्टादशभुजे, भुजङ्गवलयमण्डिते, केयूरहाराभरणे, ऽजेय खडग, त्रिशूल, डमरूमूद्गर, चषककलशशरचापवराऽभयपाश, पुस्तक कपाल, खट्वाङ्ग गदा, मुसुल, तोमरचक्रहस्ते, कृपापरे, प्रभूत, विविधायुधे, चण्डिके, चण्डघण्टे, किरातवेशे, ब्रह्माणि, रूद्राणि, नारायणि, ब्रह्मचारिणि, दिव्यतपोविधायिनि, वेदमातः, गायत्रि, सावित्रि, सरस्वति, सर्वाधारे, सर्वेश्वरि, विश्वेश्वरि, विश्वकर्त्रि, समाधिविश्रान्तिमये, चिन्मये, चिन्तामणिस्वरूपे, कैवल्ये, शिवे, निराश्रये, निरूपाधिमये, निरामयपदे, ब्रह्मविष्णुमहेश्वरनमिते, मोहिनि, तोषिणि, भयकरभयनाशिनि,

दितिसुतप्रमथिनि, काले, कालकिंकरमथिनि, कालाग्निशिखे, कालरात्रि, अजे, नित्ये, सिंहस्थे, योगरते, योगेश्वरनमिते, भक्तजनवत्सले, सुरप्रियकारिणि, दुर्गे, दुर्जये, हिरण्ये, शरण्ये, कुरू, मां दयाम, कुरु मां कृपाम।।

श्रीशारिके शरण्ये त्वां मयि दासे कृपां कुरू।
ऋणं रोगं भयं शोकं रिपून्नाशय सत्वरम्।।
प्रद्युमनशिखरासीनां मातृचक्रोपशोभिताम्।
पीठेश्वरीं शिलारूपां शारिकां प्रणमाम्यहम।।
अमा चैवतु कामा च चार्वङ्गी टङ्क्धारिणी।
तारा च पार्वती चैवयाद्यक्षिणी शारिकाष्टमी।।
शान्तिं नयस्याशु जनस्य पापं रिक्तत्वमर्थेन निराकरोषि।
कायं निषिञ्चस्यपि भाग्यपूरैः प्रगीयसेऽतः खुल शारिकात्वम्।।



अमे सुरेशि योगीन्द्रामृतगायनतत्परे ॥
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् 1
कामे कामितकामानां पूरणे पूर्णताप्रदे ॥
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् 2
चार्वङ्गि कोटिकन्दर्पलावण्ये विश्वमोहिनि
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् 3
टङ्कधारिणि शत्रूणां तिलशो देहखण्डिनि ॥
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् 4
निसर्गगम्भीरभवसागरतारिणि ॥
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् 5
पार्वति निज जन्मार्तीहिमवद्वंशपावने ॥
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणागतम् 6

यक्षिणीष्टाष्टसिद्धीनां दायिनि देवपूजिते ।।
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणा·गतम् 7
सत्त्वादिशबलेऽनन्त· ब्रह्माण्डजननीश्वरि ।।
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणा·गतम् 8
कलानिधिकलाकान्त· किरीटकुण्डलोज्ज्वले ।।
श्रीशारिके नमस्तेऽस्तु पाहि मां शरणा·गतम् 9
श्रीशारिका जगन्माता· ऽनाथनाथा सुरेश्वरी ।।
प्रीयतां पादयोरेतत्स्तोत्रपुष्पसमर्पणात
रक्षणीयं वर्धनीयं बहुमूल्यमिदं प्रभो ।
संसारदुर्गतिहरं भवद्भक्तिमहाधनम् ।।
यदुन्मीलनयुक्त्यैव विश्वमुन्मीलति क्षणात् ।
भीष्टफलोदारकल्पवल्लीं शिवां भजे ।।
रणे मां कालिका पातु द्यूते त्रिपुरसुन्दरी ।

दुर्गाऽवतु विवादे वा श्रीचक्रं सर्वदाऽवतु ।।
सर्वदा देवी पातु मां शारिका परा ।
धनं पुत्रं सुतान्दारान्गृहं यद्यत्तु नामकम् ।।
तत्तन्मम शिवः पातु वामदेवो चिदीश्वरः ।।



कुलाचार के अनुसार अथवा तहर अथवा किशमिश माता को भोग चढावें व् प्रसाद बाँटे

माता को इष्ट भोग अर्पण. कर सृष्टि के जीवों को संतुष्ट करे

हाथों मे फूल ले कर माता से क्षमा माँगे

आवाहनं न जानामि नैवजानामि पृजन्म् ।
विसर्जनम् न जानामि क्षम्यतां परमेश्वरि ।।
मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ।।
अज्ञानाद्विस्मृतेभ्रान्त्या यन्नयूनमाधिकं कृतम् ।
तत्सर्व क्षम्यतां देवि प्रसीद परमेश्वरि ।।
कामेश्वरि जगन्मातः सच्चिदानन्दविग्रहे ।
गृहाणार्चामिमां प्रीत्या प्रसीद परमेश्वरि ।।
गुह्यातिगुह्यगाप्त्री त्वं गृहाणास्मत्स्कृतं जपम् ।
सिद्धिर्भवतु मे देवि त्वत्प्रसादात्सुरेश्वरि ।।

आषढ शुक्लपक्ष सप्तमी (हार सतम) पर द्वार पर रंगोली बनायें व् रसोईघर मे छोटी रंगोली पर एक पानी का घडा रखें जिसमे अनार या किसी औषधि की टहनी रखे तथा चूने से घर के बाहर चारोंऔर शुद्धिकरण कर माता का स्वागत

